सेषु श्राद्धव्रतदिनरहितेषु संसर्गं कुर्यात्॥ तदेवाह कात्यायनः॥ ऋतुस्नातां तु यो भार्यां व्रतश्राद्धवि
वर्जिते॥ स्वपर्वे रोगरहितो यन्न संतानकाम्यया अन्यथा दोषमाप्नोति प्रायश्चित्तंमिहार्हति॥
संतिरे महाराजविजये अनिर्मितं तथा विप्रः पत्नीं ऋतुमतीं व्रजन्॥ भ्रूणहत्यामवाप्नोति प्राजा
पत्यं समाचरेत्॥ निर्मितेः पूर्वोक्तं विना ऋतुमतीं भार्यां संत्यजन् विप्रः प्राजापत्यं कृत्वा दोषमुक्तो भू
यात्॥ इति हेमाद्रिविरचिते काण्डे कालत्यपरित्यागप्रायश्चित्तं अथ कन्यागमनप्रायश्चित्तमाह देवलः
अप्रौढां कन्यकां विप्रो यस्मै ताभ्रातुरोन्वहं॥ तस्यैव नरके वासः कानीनं स्यात भद्रकः॥ मार्कण्डेयः अ एमः
असंस्कृता पुष्पहीनां कां यो द्विजाधमः॥ रं तु भिक्षुति पापात्मा नरकं याति दारुणं॥ पाराशरः मुख
जो भरव जाज्ज्ञातां कन्यां यः स परिग्रहेत्॥ स एव नरके स्थायी यावदाभूतसंप्लवं॥ प्राजापत्यं तदा मा
सेव वैचांद्रप्रकल्पितं॥ अतः परमशुद्धो भूत्वा राघूरितं भांडवत्॥ वर्षाद्रूर्ध्वं पतितप्रायश्चित्तं कृ
त्वा शुद्धिमाप्नोति विप्रस्य क्षत्रियवैश्यकन्यासंसर्गे पूर्वोक्तप्रायश्चित्ते कृत्वा पादहीने शुद्ध्यति शूद्

द्रकन्यागमने पूर्ववत् इति हेमाद्रिविरचिते कन्यागमनप्रायश्चित्तं अथ कन्यादूषणप्रायश्चित्त
माह देवलः द्विजो यो दक्षिणांकन्यां सभांमध्येति निंदयेत् ॥ स एव पापकर्मा स्यान्मत्वा नरकमश्नुते
॥ गौतमः योविप्रोदक्षिणां कन्यां विनिंदयति सर्वदा ॥ स गत्वा नरकं घोरं अविभूमान्मृतिप्रजः ॥ क
न्यादूषणमध्यमानामिकाभ्यां योनिप्रवेशं कृत्वा शुद्धनं तदेव कन्यादूषणं जावालि ॥ मध्यमा
नामिकाभ्यां च कन्यामूत्रप्रवेशने ॥ कृत्वा प्रवेशं यो विप्रः स्तत्कन्यादूषणं विदुः ॥ न विवाह्या द्विजै
ः स्नातु योनिदेशादि शोधनात् ॥ प्रायश्चित्तमिदं कुर्यात्कन्यादूषयादोषभाक् ॥ चांद्रायणत्रयं कृ
त्वा शुद्धिमाप्नोति यो विकीर्णं दक्षिणादूषणेष्वेवं इति हेमाद्रिविरचिते कन्यादूषणादक्षिणादूषण
प्रायश्चित्तं अथ पुंसि मैथुन प्रायश्चित्तमाह देवलः योविप्रः पुरुषेण छे संयवायातुरः खलः ॥ स्व
॥ स्वदारेषु मुखे वा पिय भेत्यायवयाण्वणः ॥ तस्य वीर्यं भरत्वाशु मृतो नरकमश्नुते ॥ मार्कंडेयः यो
विप्रः पुंसि संसर्गी स्वंदारेषु रतीमुखे ॥ कुर्याद्युदि हपापात्मा तदेत जीवताऽपि यात् ॥ यमलोकमुपा
गम्य तत्र वासः सदा तदा ॥ तस्यैव निष्कृतिर्नास्ति पुनः संस्कारं विना ॥ नारदः स्वदारेषु मुखे गाजन
विप्रः पुरुषं यभे घदि ॥ तस्य वीर्यं भयं याति स वै नरकमश्नुते ॥ पश्चात्तापमवाप्याय यदि छेवे शु
द्धिमाप्नुनः ॥ एकस्मिन् दिवसे प्रोक्तं मासे चांद्रं ततः परं ॥ अत्रास मुनिश्रेष्ठ षडब्दं कृच्छ्रमाचरेत्
॥ तस्य ॥ पनयनं भूयः पटगर्भविधानतः ॥ पंचगव्यं पिबेत् पश्चात् पूतो भवति सर्वदा ॥ इति हेमा

हे॰ प्रा॰
६६

द्विरचिते पुंसि मैथुनप्रायश्चित्तं अथ खरोष्ट्रवडवामैथुनप्रायश्चित्तमाह देवलः खरमुष्ट्रं च वड
वां पशुभेद्विप्रो मदातुरः ॥ यभेद्यदि स पापात्मा रौरवं नरकं व्रजेत् वासिष्ठः वडवां खरमुष्ट्रं च विप्रः
कामातुरः सकृत् ॥ रमेत् ज्ञानं विहायाशु स चैव नरकमश्नुते जाबालिः खरमुष्ट्रं च वडवां विप्रो य
दि मदांधवान् रौरवं नरकं पाति यावदाभूतसंप्लवं ॥ तस्य दोषविनाशार्थं प्रायश्चित्तमुदीरितं ॥ खरे चा
ष्ट्रे तथोष्ट्रे च पराके वडवागमे ॥ एतेन शुद्धिमाप्नोति पुनः संस्कारपूर्वकं ॥ पंचगव्यं पिबेत्सम्यक् शुद्धो ॥
भवति निश्चय इति ॥ क्षत्रियवैश्ययोर्विप्रोक्ताद्द्विगुणं प्रायश्चित्तं विशोधनं इति हेमाद्रिविरचिते ख
रोष्ट्रवडवामैथुनप्रायश्चित्तं अथ वत्समहिषवत्साजगमनप्रायश्चित्तमाह देवलः वत्सां वा
हिषीं वत्समजमेणादिकं तथा ॥ यभेत् द्विजो महापापी स च पातित्यमर्हति पाराशरः वत्समेषं
तथा वत्सं महिषीं मदनातुरः ॥ विप्रो यदि रमेत्सोऽपि यमलोकमवाप्नुयात् ॥ नागरखंडे वत्समे राम:
षं तथा वत्सां महिषीं मुखसंभवः ॥ यभेत् कामातुरः पापी मल्ला नरकमश्नुते ॥ तस्य देहविशुद्ध्यर्थं
प्रायश्चित्तमुदीरितं ॥ अजे वत्से तथा मेषे तप्तकृच्छ्रं विशोधनं महिष्यां चैव हारिण्यां च प्राजापत्य
द्वयं चरेत् ॥ पुनः ॥ संस्कारमात्रं च कृत्वा शुद्धिमवाप्नुयात् ॥ पंचगव्यं पिबेत् पश्चाद्दध्यास्वे
चांद्रमुच्यते ॥ क्षत्रियवैश्ययोरेवं द्विगुणं इति हेमाद्रिविरचिते वत्सवत्समहिषीगमनप्रा

श्चितं अथ कदाचिद्रेतोत्सर्गप्रायश्चितमाह मार्कंडेयः अयोनौ च वियोनौ च पशुयोनौ च भारत ।। स
मुत्सृजंति ये शुक्रं ते वै निरयगामिनः ।। अयोनिर्वि स्त्र्यादिकाकादिः पशुगोवत्सादि ।। नारदः कदापि
पशुपक्ष्यादौ जले वा वह्निमध्यतः विप्रः कामातुरः पापी रेतोत्सर्गं यदा चरेत् ।। तदा यमपुरं गत्वा
तिष्ठत्याचंद्रतारकं मनुः पशुपक्षिजले मार्गे वाटापां बीजमुत्सृजेत् ।। स गच्छेन्नरकं घोरं स पुन
राप्नोति दुर्लभं ।। परेद्युर्व्रतदं नीवास सचैलं स्नानमाचरेत् ।। जपेत्सहस्रं गायत्रीं ततः शुद्धिमवाप्नु
ते ।। नान्यथा शुद्धिरस्तीह तस्य पापविशुद्धये ।। क्षत्रियवैश्ययोर्विप्रप्रायश्चित्तद्विगुणं ।। इति हेमा
द्रिविरचिते कदाचिद्रेतोत्सर्गप्रायश्चित्तं अथ अवकीर्णिप्रायश्चित्तमाह देवलः आश्रमाणां तु से
वार्तिब्रह्मचारी ह देवलः ।। रेतोत्सर्गं यदा कुर्यात्स्वप्ने वा मुष्टिमैथुनात् ।। अवकीर्णी स विज्ञेयः सर्व
कर्मबहिष्कृतः ।। गालवः मौंजीबंधदिनादूर्ध्वं ब्रह्मचर्ये भवेत्स्मयं ।। एतेन्वर्णीह दुःसगा ।
घोनौ रेतस्समुत्सृजेत् ।। अवकीर्णी स विज्ञेयः सर्वदा तत्परित्यजेत् ।। तस्य देहविशुद्ध्यर्थं याकृप
संचनेत्रं ति ।। यस्मात्सुदुस्तमश्रीपापाच्छुद्धिमाप्नोति वै पूर्वी ।। पुनः संस्कारपूतात्मा पंचगव्यं पिबेन्नतः
।। एतेन शुद्धिमाप्नोति ब्रह्मचारी न चान्यथा ।। इति हेमाद्रिविरचिते अवकीर्णिप्रायश्चित्तं ।। अथ
मिथ्यारोपप्रायश्चित्तमाह देवलः योविप्रः साधुविप्रेषु पुण्यवत्सु द्विजेषु विह ।। मिथ्यारोपम

प्रहे ६० हानिदोषोत्पस्मिन्निति प्रवदन्मृषा ॥ महाभारते साधुवृत्तेषु विप्रेषु विप्रेषु यो विप्रोऽभिध्याय पापं वदेत् ॥ स्तेयं वा
व्यभिचारे वा हत्या वा ब्रुवति सर्वदा ॥ इति यो वदते साधून् स भिध्याधितत्वात् द्विजः ॥ देवकार्ये श्रुति
६१ श्रेषु त्यजनहो मिथ्यापापं वदन् मार्कण्डेयः पापीयं पापजप्यानां न वदेद्धैक दाचन ॥ अस्ति त्वेनुस्तप
पीस्सान् मिथ्या चेत् ॥ मारीचिः मिथ्या यासादिवृत्ते मिथ्यापापासादिवृत्तेषु दोषारोपि गुणेषु यि ॥ वि
प्रेषु वा चावदनामेसमास्छेले ॥ स एव नरकं गत्वा श्वानयोनिषु जायते ॥ तस्या पापविनाशाय प्राय
श्चित्तं महत्तरं ॥ विप्रेषु तप्तकृच्छ्रं स्यादंगनात्विह कायकं बालवधातुरे घेषु वदन्या एकमाचरेत् ॥ स्त्र
त्रिपादीषु सर्वेषु प्राजापत्यमुदीरितं ॥ न मिथ्याभाषणं कुर्यादोषारोपं परित्यजेत् ॥ इति हेमाद्रिविरचिते
मिथ्याधीति प्रायश्चित्तं अथाभिशस्तप्रायश्चित्तमाह देवलः पूर्वीयन्निंद्यावादो बोत्वयशः परिव
र्तते ॥ तस्मादेतद्विशुद्ध्यर्थं प्राजापत्यद्वयं चरेत् ॥ अभिशस्तो महद्दोषान्मुच्यते नात्र संशयः स्मः
॥ गालवः मिथ्यया पापपावन्नोत्थ अभिशस्त इतीरितः ॥ पापमस्ति न वा तो केवा तीसर्वत्र ग ६१
म्यते ॥ तद्दोषपरिहारार्थं प्राजापत्यद्वयं चरेत् ॥ अन्यथा दोषमाप्नोति पापस्यैतस्य गुरुहनात् ॥
मिथ्यात्वेप्रायश्चित्तार्थं स्त्रिपादीनापूर्वं इति हेमाद्रिविरचिते अभिशस्तप्रायश्चित्तं अथ कूपा
मलक्षणमाह मारीचिः श्रोत्रियभ्रातटाकादिस्थाणां यत्तं वेधनं ॥ बांधवास्सकुलीनाश्च

द्विद्वान्वैघोप्रहाधनी॥नं संतियत्रयाप्रेवसन्तुकुग्रामइदिनः॥अपिवयत्रद्विबामोपनास्ति
नत्रादिवसं चरेत्॥ यामेद्विजो यस्त्र हव्यकव्यएधनुरवः॥एकत्रदिवसेतिष्ठन्महापापमवाप्नु
ते॥तस्यैवनिष्कृतिर्दिष्टावर्षेचांद्रायणव्रतात्॥मासेपराकं पराष्मासेप्राजापत्यंसमाचरेत्॥
तस्मादतुंपरित्यज्य धूमध्येवसेत्सदा॥ इतिहेमाद्रिविरचितेकुग्रामवासिनप्रायश्चित्तं अ
पकुत्सितसेवाप्रायश्चित्तमाह देवलः नतस्यगायकश्चैवप्रद्रोहीदुर्जनएवच॥स्तेपिनः कित
वश्चैवनरातेदुर्जनाःस्मृताः॥एतेषांयोदुर्जनः सेवाप्रत्यहं समपाचरेत्॥नतस्यनिष्कृति
र्नास्तितप्तकृच्छ्रत्रयादिह॥ सेवाप्रकारमाह गौतमः शीचार्थं प्रति क्षातोपं प्रत्यहं वचनक्रियां॥
तद्दासवनुसत्येवहस्तपादविमर्दने॥उच्छिष्टमार्जनंतेषांपात्रवेल्लादिधारणं॥एवंद्विज
प्रतिदिनंसेवांकुर्वन्प्रवर्तते॥सएवनरकंयाति पीव्रस्मकस्यादिह॥तदोबयरिहस्यं यदा मा
सादिनत्रीमात्॥दिनेकस्मिन्नराक्षःस्यात्क्षेत्रप्रभुरीरितं॥प्राजापत्यंतथामासेवर्षेचांद्रम ण
णं॥कृत्वाशुद्धिमवाप्नोतिवर्षादूर्ध्वंपतितंसो॥वर्षादूर्ध्वेपतितप्रायश्चित्तंकृत्वाशुद्धिमवाप्नो
तीत्यर्थः॥नान्यथा इतिहेमाद्रिविरचितेकुत्सितसेवाप्रायश्चित्तं अथखरोष्ट्रयानद्वयान हिवद
त्वारोहणप्रायश्चित्तमाह देवलः खरमुष्ट्रंच महिषमनड्वाहमजं तथा॥ बस्त मारुह्य मुख

प्राहे नः क्रोशमात्रं प्रवर्तयेत् ॥ महांतं दोषमासाद्य भुवि भूकास्तु वानरः ॥ पाराशरः ॥ खरमुष्ट्रमनड्वाहं वत्सं माहि
६८ षमेव च ॥ अजमारुह्य सहसा विप्रः क्रोशं गतो यदि ॥ महांतं नरकं गत्वा वानरो भुवि जायते ॥ क्रोशप्र
६९ माणमाह लौगाक्षिः ॥ तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयं ॥ प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशां
गुला ॥ वितस्तिद्विगुणा रत्निस्ततः किष्कुस्ततो धनुः सहस्रकोऽष्ट च तु क्रोशं तु योजनं ॥ सार्धं क्रोश
मयोजनं यदि वहते विप्रस्त्वेषामारोह्य पथि कृपा प्रायश्चित्तमाह मार्कंडेयः ॥ खरमारुह्य विप्रो सो ।
योजनं यदि गच्छति ॥ तप्तकृच्छ्रत्रयं प्रोक्तं कृत्वा शुद्धिमवाप्नुते ॥ उष्ट्रं च माहिषं चैव तथानड्वाहं द्विजः
सकृत् ॥ आरुह्य पूर्ववद्गच्छेत् प्राजापत्यं तु हि स्मृतं ॥ अजं वत्सं तथारुह्य पूर्ववद्यदि गच्छति ॥ त
त्र सांतपनं प्रोक्तं शरीरस्य विशोधनं पुनः कर्म प्रकुर्वीत यथा स्थमेव विधानतः ॥ एते न शुद्धिमाप्नोति
द्विजो नान्यत्र शुध्यति ॥ एकस्मिं दिवसे एकयोजनेषु तं प्रायश्चित्तं द्विजो येन तीर्थे ऽभ्यासे एमः
द्विगुणं त्रिगुणं चतुर्गुणं वेदितव्यं सर्वत्र पुनरुपनयनं इति हेमाद्रिविरचिते खरोष्ट्रमहिषवत्सा ६८
रोहणप्रायश्चित्तं अथाग्न्याहितानां अन्याहिताग्नेः प्रायश्चित्तमाह देवलः समुद्रयात्रा स्वीका
रः कमंडलु विधारणं ॥ दत्ता क्षता या कन्या या पुनर्दानं परस्य च ॥ दीर्घकालं ब्रह्मचर्यं वर्जयेत्तु क
लौ युगे ॥ एतान्यकर्मोऽन्यस्तत्र यो विप्रो दोषभाग्यदि ॥ तस्यैव निष्कृतिर्नास्ति तप्तकृच्छ्र सदिद ॥ गो

ततः पूर्वमुद्वाहिताकन्याभ्रमस्येद्वाहमाप्नुयात् ॥ तयोः संसर्गतो विप्रो मातृगामीति गद्यते मार्कंडेयः सगो
त्रां प्रवरां ज्ञातिमातरं भगिनीं तथा ॥ अज्ञातपूर्वमुद्वाह्य ज्ञात्वा पश्चात्परित्यजेत् ॥ यदि पुष्पवती गच्छेत्तत्रो अन्ता
मातुरस्सकृत् ॥ मातृगामीति विज्ञेयः सर्वकर्मबहिष्कृतः ॥ पुत्रोत्पत्तौ तयोः आयुःक्षयमवाप्नुयुः ॥ तद्दोष
परिहारार्थं देहशुद्धिं समाचरेत् ॥ अज्ञानात् यत्र चोद्वाहस्तत्र चान्द्रमुदीरितं ॥ यदा पुष्पवती गच्छेत्तदा दोष
मवाप्नुत ॥ गुरुतल्पसमं प्रोक्तं मुख्यमेद्रविवर्जितं ॥ पुत्रोत्पत्तौ करिष्यादाहयव विधीयते ॥ महान्तं दोषमासा
द्यभूपानिधनकांक्ष च ॥ मन्त्रसाद्वाहि राजेन्द्र दद्यादि योऽसदातुरः ॥ भ्रूणहत्यासमं पापमवाप्नोतीह तत्क्ष
णात् ॥ दातुः शुद्धिं करिष्यान्नैः परिणेतुस्तथैदंवं ॥ साकन्या ज्ञातिभिः प्रोक्ता तत्पुत्राः कुंडसंज्ञिकाः ॥ अनेकदो
षवाहुल्यादेनं मार्गं परित्यजेत् जाबालिः पूर्वमुद्वाहितां कन्यां पिता भ्राता धने कृपा ॥ ततो यदि हरे
द्वाहुल्यस्व त्यानीं करोति चेत् ॥ महद्दोषमवाप्नोति तयोंति अधोगतिं ॥ दातुरःशुद्धकारी बाप्नेवौठ चांद्रायणा
त्रयैः ॥ साकन्यापां सुनालता यांसु ऋषे पातमकुंड संज्ञिकः ॥ एतद्दोषाविष्णु धार्थं प्रायश्चित्तं समाचे
त् ॥ कन्यादातुश्चापाये प्रसहं स्त्ला नमाचरेत् ॥ वर्षमात्रे वा संप्तुस्यो हिष्यते ॥ तद्दर्भीतोप रित्तिज्ञकुर्या चांद्रा
यणात्रयं ॥ तस्यो पवनं भूयः शुधिमाप्नोत्यनुत्तमं ॥ साकन्या पूर्वजंचान्यं त्वा चांद्रायणं चरेत् ॥ शिष्यु चांद्राय
णामि त्वर्यः ॥ अत्यथा नरकं व्रजेदिति ॥ उभयोः संसर्गे पुत्राभावः ॥ पुत्राभावे कन्यायाः चांद्रायणाच्छुचि
ः ॥ पुत्रो मतौ स्यात् पुत्राणां गतिर्नास्ति ॥ अतस्त्वभयोस्त्याग एव वरः इति हेमाद्रि विरचिते उद्वाहितायां

मय = ३

६९ 69 कन्यायाः पुनरुद्वाह प्रायश्चित्तं ॥ अथ मातृस्वसृसंबंधपरिणये प्रायश्चित्तमाह देवलः स्वसारं मातरं च ।
स्त्रस्य विचार्य स्वबंधुतः यस्मात् तां त्यक्त्वा परित्याज्य स्वसामातां तु धर्मतः ॥ गौतमः संबंधाद्दोषयदि द्वला दौ
मातृतः पितृतस्तथा ॥ सगोत्रां प्रवरजां कन्यां मातरं भगिनीं त्यजयेत् ॥ यदि काममद्विवाहे तेषामहहो
यमवाप्यते ॥ सगोत्रायाः प्रवरजायाः परिणयादौ प्रायश्चित्तं पुनः संस्कारस्त्वेवानयाः कन्यकायाः पुरुष
यस्यार्धं प्रायश्चित्तं ॥ क्षत्रियावैश्ययोरेतद्धि गुणं इति हेमाद्रिविरचिते मातृस्वसृसंबंधपरिणय प्राय
श्चित्तं अथ स्वदारपरित्यागप्रायश्चित्तमाह देवलः निःकारणानयावत्लीय त्यजेद्यस्त्यजेत्पूर्वं जोहूया
॥ न तस्येह परत्रापि निंदितः सर्वजन्तुभिः ॥ गौतमः अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् ॥ मृतप्र
त्व जां पंचदशे सद्यस्त्वप्रियवादिनीं ॥ अप्रियवादो नामकलौ युगे साक्षाद्व्यभिचारः ॥ अप्रियवाग्योऽभ
र्ते विषये कलौ युगे बहूनि संति ॥ साक्षाद्व्यभिचार एव अप्रियवादनात् ॥ तान्या अन्यथादोषमाह देव एमः
लः व्यभिचारएदते यत्नी यो विप्रः संपरित्यजेत् ॥ भ्रूणहत्यामवाप्नोति ऋतुकालव्यतिक्रमात् ॥ ख ६९
राजिनं बहिर्लोमपरिधाय समन्वितः ॥ शृणवने पात्रमादाय भिक्षार्थं ग्राम समाचरेत् ॥ दारव्यति
क्रमे यो मे भिक्षां देहीति याचयेत् ॥ सप्तागाराणि पदित्वा य भोजयेत्सा ग प्रमादरएत्वषण्मासमे
वं कृत्वा तच्छुद्धिमाप्नोतीति पौर्विकीं आपस्तंबः दारव्यतिक्रमी खराजिनं बहिर्लोमपरिधाय दारव्य

ऽग्निरवराजिनं बहिर्लोमपरिधापदाति त्र्यग्निर्मो भिक्षां भिदेहीति याचे यदा पुष्पवती कन्या तद्रूतीव
बलीयतिः ॥ वृषलः शूद्रः यावकन्या पितृवेश्मस्था यदि पुरुषपवती भवेत् ॥ असंस्कृता परित्याज्या
नयश्येतां कदाचन ॥ विवाहे च न योग्या स्यात्रौकाद्रूपविगर्हितः ॥ एतामन्यः परिणयेद्द्विजो न योग्या हव्य
कव्ययोः ॥ न तस्या जनयेत्पुत्रं कानीन इति कथ्यते ॥ माता पिता च पुत्रश्च त्रयस्ते वृषला भवन् ॥ यदा पुष्पवती
कन्या तद्दैवकृत्यस्त्वद हेति ॥ न तत्र दोषस्तस्यास्ति गृहे स्थित्वा स दोषभाक् ॥ गौतमः यदा रहासुष्पवती द्वि
जस्तां शुद्ध हे यदि ॥ कालांतरे यदा प्रभुत्वा तदा तां परित्यजेत् ॥ यदि छेदात्मनः शुद्धिं तदा पयांचरेत् ॥ का
मातुरस्तदावर्ते सचंडालसमो भवेत् ॥ पुत्रीत्यजेर्यदा भूत्वा तदा पतितपूयसः ॥ इति हेमाद्रिविरचिते पितृ
गृहे स्थिता कन्या रजस्वला प्रायश्चित्तं अथ कारागृहनिवासप्रायश्चित्तमाह ॥ देवलः कारागृहे बलात्ता
रात् स्थित्वा मासमंतद्रितं ॥ न स्नानं न च नवासं ध्यानं देवर्षितर्पणं ॥ न स्वाध्यायेन वा होमः शूद्र एव
न संशयः ॥ मारीचिः मासं कारागृहे वासो नैधियी त्रादिनत्रयं ॥ शतमावेशस्तस्याप्यछ्रयो वर्तते स तु
पातकी ॥ गौतमः बलाद्दासं स्कृतायेन् श्वपचचंडालदस्युभिः ॥ अशुभं कारिता कर्म गवादिप्राणिहिंसनं ॥
उच्छिष्टमार्जने तेषां तथा तस्यैव भक्षणं ॥ तत्स्त्रीणां च तथा संगता भिश्च सहभोजनं ॥ नसौ पितौ द्वि
जातौ तु प्रजापत्यं विशोधनं ॥ प्राजापत्यं च चांद्रं च चरेत्सम हरोषितः ॥ आहिताग्निस्तु यत्कुर्याद्यदिको

७० कारागृहे वसन्‌॥ स्त्रीणामेतास्मिन्‌ संभवे विप्रस्य प्रायश्चित्तार्धमनुनोदितं विशोधनं॥ यमः कारागृहाद्वि
70 निर्गतस्य प्रायश्चित्तं पर्यायोतं कृत्वा विप्रः पुनः कर्म कुर्याच्छुद्धिमवाप्नुयात्‌॥ नान्यथा शुद्धिमाप्नोति
यथा श्रुति गतोद्यघटः॥ इति हेमाद्रिविरचिते कारागृहनिवासि प्रायश्चित्तं बंदीतानां नारीणां प्रायश्चि
त्तमाह मार्कंडेयः बंदीकृत्वा तथा नार्यो निवसेतु तदालये॥ क्षणं मासं त्र्यृतुं वापि संवत्सरमथापि
वा॥ मृतानां निष्कृतिर्नास्ति व्यभिचारो यथा भवेत्‌॥ तत्रापि गर्भसंपातौ परित्यागो विधीयते॥
भर्त्यागो विधीयेत इति मनुस्मारणाच्च तदाह गौतमः बलाद्वंदीकृतानारीतत्रैव निवसेद्यदि
॥ पक्षमासं त्र्यृतु चाब्दं न तस्या निष्कृतिर्भवेत्‌॥ तत्रैव व्यभिचारस्याद्यदि गर्भमधात्तदा॥ दैवतः पुनरु
त्स्रष्टात न शुद्धिः कथंचन॥ तां पतिः पुनरादातुं विभेद्वे लोकवार्तया॥ इच्छन्‌ सभामया नीय बहुधा पंक्तिदि
क्षितं॥ इति भर्तुस्तु तान्नारी सा वदेत्सत्यमादरात्‌॥ उक्ते सत्ये तया सा तु सभासभ्य विचार्य च॥ षड्भिर्मि भृ राम:
तिकाभिश्च घृत शौचमनन्तरं॥ कारयित्वा विधानेन स्नापयित्वा तदा जलैः॥ कारयेत्पूर्ववद्विप्रं प्रा ७०
यश्चित्तमनुक्रमात्‌॥ अर्धमुक्तं तत स्त्रीणां प्रायश्चित्तं विशोधनं॥ कृत्वा शुद्धिमवाप्नोति शास्त्र
दृष्टेन कर्मणा॥ तस्याद्दोषं न विद्यते स्याज्जनवादैर्न हीयते॥ अतस्तु पोषणाग्रागमस्याः संसर्गो दे

कारयेत्॥ इति हेमाद्रिविरचिते बंदीकृतप्रायश्चित्तं अथ रोगनिवृत्त्यर्थं मद्यमांसं॥ औषधार्थे पिबेत्स्नानं मद्यं वा वैद्यचोदि
तं॥ तदा रोगनिवृत्तिश्च मरणं वाप देहुत॥ तस्य देह विशुध्यर्थं तप्तकृच्छ्रं समाचरेत्॥ शेवतावे पुनः कर्मकर्तव्यं देह शुद्धये
॥ तसं कृच्छ्रं द्विजः कार्यं दत्वा वा बहुदक्षिणां॥ एतेन शुद्धिमाप्नोति प्रेतेजीवन् उभौ तदा॥ रोगात्वसौ सन्निपाते स्नानं वा मद्यमे
वर्ष॥ तप्तकृच्छ्रं प्रायश्चित्तं कृत्वा पुनः संस्कारं कृत्वा शुध्यति मृतश्चेत्तप्तकृच्छ्रं प्रायश्चित्तं प्रत्याम्नायं ब्राह्मणैः कारयित्वा
तत्पुत्रादिकपरलोकसाधनार्थं शवमन्वारभ्य यटगर्भे विना मंत्रवत् कुर्यात्॥ एवमेवास्मिन् कृते सति स्नपानमद्ययान
दोषयुतः सन् परलोकसुखमवाप्नोति अन्यथा पापकर्मैव इति हेमाद्रिविरचिते मद्यपान स्नानपाने रोगनि।
वृत्त्यर्थं पीत्वा प्रायश्चित्तं लिखितं इति हेमाद्रिविरचिते धर्मशास्त्रे प्रायश्चित्ताध्याये अपात्रीकरणप्रायश्चित्तं अथे
दानीं जातिभ्रंशकरणप्रायश्चित्तमाह अथ परान्नभोजनप्रायश्चित्तमाह देवलः मृते याते पदन्नं च महापुरुष।
भोजनं॥ कुमारिजनने भुक्ति दशाहे वलिदेवच॥ भूतप्रेतपिशाचानां पदन्नं बलि लिप्ते कुदेवभोजनं चैव ब्रह्मराक्ष
सभोजनं॥ एतानि दूरन्नानि एते ब्रपो विप्रो धनलोभपरायणाः॥ भुक्त्वा तस्य गतिर्नास्ति तस्मादेतत्परित्यजेत् मा
कैडेयः दुष्टान्नेभुक्ते जो भुक्त्वा वलद्रव्यपरायणाः॥ तदानीमृत्युमाप्नोति जीवेद्वापारकार्यसौ॥ न तस्य पुनरावृ
त्तिर्यमलोकात्कदाचन॥ पिशाचजन्मवान् भुक्त्वा तं दंते कृकुवान् भवेत्॥ गौतमः दुष्टान्नं यो द्विजो भुक्त्वा पूर्वोक्त
पांपरूपि पत॥ सद्य एव परं स्पृत्यु यावि श्पज्वरादिभिः॥ प्रयाला नरकमासाद्य कारुन्नाम्नी भवेत्तदा॥ तस्य

७१ दोषोपशांत्यर्थंप्रायश्चित्तमिदंस्मृतं ॥ प्राजापत्यद्वयंकृत्वापुनःसंस्कारपूर्वकं ॥ पंचगव्यंपिबेत्पश्चाच्छुद्धोभ
७१ वतिभूतले ॥ इतिहेमाद्रिविरचितेपरान्नभोजनप्रायश्चित्तं अथायुतब्राह्मणप्रायश्चित्तमाह देवलः अयुतेवा
नानावर्णासमागमे ॥ पतितक्लीबचंडालप्राजापत्यतस्करपूरिते ॥ कुंडगोलकसंघातेनटगायकसंकुले ॥ षा
ण्डतनसंसर्गेसर्वपातकसंकुले ॥ भांडोच्छिष्टस्वपंपाकीस्त्रीजनैरुपशोभते ॥ योविप्रोलोकमन्विष्य न
भुंजीयात्कदाचन ॥ यमोजिह्वांदहत्याशुतप्तंदंशैप्रदेशदारुणैः ॥ तंदंतेभुवमासाद्यविडराहत्वमाप्नुयात् ॥ मार्कं
डेयः अयुतेवासहस्रेवाद्विजोब्राह्मणभोजनेजिह्वाचापल्यतःक्षिप्रंभुंक्तेयदिद्विजाधमः ॥ तस्यजिह्वांयमश्छि
त्वानरकेस्थापयेत्यधः ॥ तत्रैवनरकंभुक्त्वाकरत्वमवाप्नुते ॥ एकस्मिन्दिवसेभुक्त्वापंचगव्यंपिबेत्तत ॥
पक्षंवामासमथवाभुक्त्वाविप्रोनिरंतरं ॥ तस्यपराकंचांद्रंचांद्रंचकृत्वाशुद्धिमवाप्नुयात् ॥ पुर्वोपरिहसूद्रत्व
अवाप्नवद्वत्सरान् ॥ इतिहेमाद्रिविरचितेअयुतब्राह्मणभोजनसहस्रब्राह्मणभोजनप्रायश्चित्तं अथदीर्घ एप्रः
सत्रभोजनप्रायश्चित्तमाह ॥ देवलः वर्षद्वयंवावर्षंवाकोवाजनाधिप ॥ संकल्प्यभोजयेत्विप्रान्नूतदीर्घसत्रमुच्य ७१
॥ विप्रस्तत्रनभुंजीयात्पूर्ववत्दुष्टसंगमात् ॥ महद्दोषमवाप्नोतिनरकंचाधिगच्छति गालवः दीर्घसत्रेन
भुंजीयादेकस्मिन्नपिवसेन्टप ॥ महद्दोषमवाप्नोतितत्रनानागमात् ॥ कर्तारंस्वकृतंपुण्यंसंवत्सरमुपार्जितं
॥ सतःप्राविश्यत्तत्सर्वंअंनयात्रपरिग्रहात् ॥ प्रायश्चित्तीभवेत्स्मात्तदाल्पयादोषवार्यसी ॥ मासस्संख्यादिक

मवलोऽप्यपूर्ववत्प्रायश्चित्तवत्सर्वं कुर्यात् तुल्यो भवति नान्यत्र इति हेमाद्रिविरचिते दीर्घसत्रभोजनप्रा
यश्चित्तं अथ शूद्रः इच्छन्विप्रो महान्तु लोकानुसंगाद्धा महान्तु भवेत् ॥ माहांतं नरकं गत्वा भुवि शूद्रात्स वायसः
वंडालो वा मार्कंडेयः शूद्रान्नं शूद्रसंपर्कं मासमेकं निरंतरं ॥ इजहत्या नि शूद्रत्वं चंडालः कोटिजन्मसु ॥
॥ मनुः तरन्नं तत् गृहे भुक्तिं तदनुज्ञानिरीक्षणं ॥ भुक्त्वा विप्रस्य पापीयान्यद्दुग्धं शूद्रभोजनं ॥ एतेषामेव न
विप्रो भुक्त्वा तु चापलं ॥ माहांतं नरकं गत्वा वायसत्वमवाप्नुयात् ॥ पक्षमासेऽकृतं तदनुज्ञामवाप्याथ स्व
पं वापि निरीक्षणं ॥ अब्दे भोजने तु यथाक्रमं ॥ पावकं तप्तकृच्छ्रं च प्राजापत्यमथैं दंव ॥ क्रमशः शुद्धि
माप्नोति कृत्वा पापादितानुगात् ॥ विप्रस्त्रीणां भोजने प्राप्ने पक्षमासक्रमेणात तत्प्रतिपदोक्तं विप्रस्यार्धं वेदि
तव्यं इति हेमाद्रिविरचिते शूद्रान्नभोजने प्रायश्चित्तं ॥ अथ शूद्रवेश्यागृहयोः स्वयंपाकादिभोजने प्रा
यश्चित्तमाह जातूकर्ण्यः शूद्रवेश्यागृहे विप्रस्तदा मासं वसन्मुदा ॥ तत्रैव भोजनं कृत्वा सद्यश्चांडालतां व्रजे
त् ॥ देवलः वेश्याशूद्रालये राजन् तद्द्रव्यं पाचयेत् द्विजः ॥ तत्र च भोजनं कृत्वा तदनुज्ञा पुरःसरं ॥ तस्य
निष्कृतिर्नास्ति पापश्चितापुतैरपि ॥ वेश्याशूद्रगृहे राजन् गृहीत्वा प्रसकृद्द्विजः ॥ तत्रैव पक्वं तद्द्रव्यं भोज
यित्वा विचारयन् ॥ सहस्रांतं गिरिं गत्वा तत्रैव पतनं चरेत् तेन शुद्धिमवाप्नोति नान्यथा मतिरस्ति हि ॥
॥ पराशरः वेश्यालये वा शूद्रआमं दत्त्वा तदर्पितं ॥ भुक्त्वा विप्रस्तु पापीयान्महांतं नरकं व्रजेत् ॥ ए

प्राहे· नभूतलमागम्य चंडालत्वमवाप्नुयात्॥ तद्दोषपरिहारार्थं प्रायश्चित्तमिदं स्मृतं॥ यदि भुंजीत तदानीं वा वापयि
७१ त्वा शिरो नरोऽनघ॥ स्नानं कृत्वा ततः पश्चात् सकृच्छ्रं समाचरेत्॥ पंचगव्यं पिबेत् पश्चात् शुद्धो भवति निदितं॥ वि
72 प्रश्चिय स्त्वेवं इ इति हेमाद्रिविरचिते शूद्रवेश्म गृहभोजनप्रायश्चित्तं अथ एकादशाहभोजनप्रायश्चित्तमाह
देवलः प्रेताहे काद्दशो विप्रो भुंक्त्वा कवलसंख्यया॥ तावद्युगसहस्राणि रौरवं नरकं व्रजेत्॥ तदंते भुवमा
साद्य रक्तभोजी भवेज्जले॥ यावंत्यन्नपुलाकानि कवले कवले नृप॥ तावंतः कृमयः सर्वे भक्षस्तस्तेन पा
र्थिव॥ नारदः एकाहदिवसे राजन् द्वात्रिंशत्कवलसंख्यया॥ गृहीत्वा मूत्यमश्नाति तावंतः कृमिराक्ष
शयः॥ भक्षितास्तेन ते राजेंद्र तत्त्वेन परिवर्जेत्॥ कवले कवले कवले चांद्रं कृत्वा शुद्धिमवाप्नुते॥ पुनः
कर्मविधानेन घटगर्भे व्यशुद्ध्यति॥ अन्यायाद्दोषमाप्नोति प्रेतोभूत् भुवि चारयन्॥ महापातकयु
क्तो वा युक्तो वा सर्वपातकैः॥ घटगर्भविधानेन पुनः संस्कारकृन्नरः॥ शुद्धिमाप्नोति राजेंद्र घटगर्भोप प्राः
हतरः॥ इति हेमाद्रिविरचिते एकादशाहभोजनप्रायश्चित्तं अथ नवश्राद्धनवश्राद्धप्रायश्चित्तमाह न ७१
वश्राद्धे गृहीत्वान्नं द्विजोत्तमः॥ न तस्य पुनरावृत्तिर्यमलोकात्कदाचन॥ जायते भुवि तु व्यात्मा स्थाव
रत्वमवाप्नुते॥ मारीचिः॥ नवश्राद्धं नवश्राद्धं दशाहे ब्रांतरे द्वयं॥ प्राश्नं पापालयं नृणां माहांतं गर्हि
तं द्वयं॥ पाराशरः नवश्राद्धं च न ग्रं च सूतकान्नं तर्हि तं द्वयं॥ तद्धं परप्रतिगृह्णाशुभ मंहारो रवमश्नुते॥ दे

देवलः न ग्रश्राद्धेनु चांद्रस्यात्प्राजापत्यं न वात्मको॥ आद्यस्थानेततदर्धं स्यात्सपिंडने॥ प्रायश्चित्तमिदं कृत्वा शु
द्धो भवति पूर्वजः॥ विप्रप्रतिग्रहे यथाशास्त्रोक्तं त्रिपर्वैश्यप्रतिग्रहे द्विगुणं इति हेमाद्रिविरचिते नग्नश्राद्धन
वश्राद्धप्रतिग्रहप्रायश्चित्तं अथ सूतकद्वितीयभोजनप्रायश्चित्तमाह देवलः सूतकं द्वितीयं राजन्नूज्ञातिरन्य
द्विजो यदि॥ अज्ञानाद्भोजनं कृत्वा सद्यः संस्कारमर्हति॥ ज्ञात्वा तदन्नं संवात्संयच्च गव्यं पिबेत्ततः॥ शुद्धभा
वेतदस्नात्वा पुनः कर्मपरेहनि॥ उपोष्य रजनीमेकां पंचगव्येन शुध्यति॥ अथवा नरकं घोरं यास्येव न संशयः
॥ मार्कंडेयः सूतकद्वितीये स्नात्वा विप्रो भोजनमादरात्॥ कृत्वा शुद्धिमवाप्नोति नातथा शुद्धिरीरिता इति हे
माद्रिविरचिते सूतकद्वितीयभोजनप्रायश्चित्तं अथ श्राद्धान्नशिष्टभोजनप्रायश्चित्तमाह देवलः अमापा
र्वतकश्राद्धे पर्वश्राद्धे महालये॥ श्राद्धे षण्णवत्याख्ये सपिंडीकरणे तथा॥ मासके च मृतश्राद्धे विप्रो न कुर्या
च्छेषभोजनं महाभारते चोल्लकर्मणि भोक्तारो भोक्तारो यज्ञकर्मणि॥ श्राद्धान्नशिष्टभोक्तारः स्युर्वै निर
यगामिनः॥ सगोत्रियाणां सकुल्यानां ज्ञातीनां संदोषभाक्॥ पुत्रिणामन्यगोत्राणां विधवानां न दृश्यते॥ य
तीनां कर्मिनिष्ठानां महतां ब्रह्मचारिणां॥ न भोक्तव्यं पैतृकादौ पैतृशेषं महात्मनो॥ जाबालिः श्वशुरस्य
गुरोर्वापि मातुलस्य महात्मनः॥ ज्येष्ठभ्रातुश्च पित्रोश्च ब्रह्मनिष्ठस्य ज्ञातिनः॥ एतेषां श्राद्धशिष्टान्नं भु
क्त्वा दोषो न विद्यते॥ इति केचित्संशंसंतीति यत्तदसांप्रतं॥ लिंगपुराणे मातुलस्य गुरोर्वापि श्वशुरस्य महात्म

प्रा०हे नः॥ ज्येष्ठभ्रातुश्च पित्रोश्च ब्रह्मनिष्ठस्य ज्ञानिनः॥ एतेषां श्राद्धशिष्टान्नं भुक्त्वा दोषो न विद्यते॥ इति के
७२ चित्प्रशंसंतीति यत्तदसांप्रतं॥ लिंगपुराणे मातुलस्य गुरोर्वा पितृव्यश्वशुरस्य महात्मनः॥ पित्रोश्च ब्रह्मनिष्ठस्य
73 ज्येष्ठभ्रातुश्च ज्ञानिनः॥ यैरेकैः पुनर्भोक्तव्यं विधवानां महामुने॥ विधवानाममगोत्राणां श्राद्धे पुनर्भोक्त
व्यं श्राद्धशिष्टान्नं अन्यगोत्राणां ब्रह्मचारिणामपि॥ तदाह मार्कंडेयः पित्रादीनाममयान्येषां श्राद्धशिष्टान्न
भोजनं॥ व्रतीनां विधवानां च यतीनां च विगर्हितं॥ विधवानामन्यगोत्राणामिति सर्थः जावालिः विप्रस्य
न्यगृहे श्राद्धे शिष्टान्नं भोजनं चरेत्॥ प्राजापत्यं विशुद्ध्यर्थः स्यात् स्वाति गोत्रे न दोष आह॥ अन्य
गोत्रो विज्ञं तु यः श्राद्धे शिष्टान्नमश्नुयदि॥ केशानां वपनं वापनं कृत्वा तप्तकृच्छ्रं समाचरेत्॥ व्रती
नां योगनिष्ठानां तथा संन्यासीनामपि॥ अभयोर्देहशुद्ध्यर्थं यत्नेकं कृच्छ्रमाचरेत्॥ संन्यासी वपनं
कृत्वा ततः स्नानं समाचरेत्॥ उपविश्य सुखी भूत्वा प्रणवलक्षमाचरेत्॥ सर्वत्र पंचगव्यप्राशनं
संन्यासिभिर्विना॥ ब्रह्मचारिणां स्वपित्रोः श्राद्धान्नविशिष्टभोजनेन दोष॥ भ्रात्रादीनामपि॥ वि एम:
धवानामन्यगोत्राणां तत्रापि न भोक्तव्यं संन्यासिभिर्न कुत्रापि॥ इति हेमाद्रिविरचिते श्राद्धशिष्ट ७२
भोजनप्रायश्चित्तं अथ क्रीतान्नभोजनप्रायश्चित्तमाह देवलः देवालये खुमार्गेषु ग्रामेषु नगरेषु
च॥ विप्रः क्रीतान्नभोक्ता चेत् हानरकमाप्नुयात्॥ प्राह भारते क्रीतान्नं देवतागारे ग्रामे वा पह

वोयषि ॥ योभुंक्ता पूर्वजो न्नानान्नरकं समवाप्यते देवीपुराणे विप्रः कंठगतःप्राणाः क्रीतान्नं परिभुं
जते ॥ ग्रामेवानगरे तीर्थे महादेवालयेपि वा ॥ ग्रासान्नरकं घोरं नाना योनिषु जायते ॥ न सेतस्य विशु
ध्यर्थं प्रायश्चित्त मुदीरितं ॥ त्रिरात्रं भोजने कार्यं पक्षेति येन निरंतरं ॥ महांतं तत्र मासि च वत्सरे चांद्रमु
ख्यते ॥ अतः परं शूद्रतुल्यो विद्वानपि सदोषभाक् ॥ विप्रस्त्री काम्येनान्नदर्श ॥ पतिव्रतचारी विध
वानां तद्वैगुण्यं ॥ महाक्षेत्रमिति जनसाहश्यात्क्षाभोजने वा विशेषमाह जाबालिविप्रस्वेतन्म
हाक्षेत्रं महातीर्थं जनावृतं ॥ क्रीतान्नं जनसादृश्यादिति जग्ध्वा सकृद्यदि केशानां वपनं प्रोक्तं तप्त
कृच्छ्रं समाचरेदिति ॥ मारीचिः देवतान्नं न भुंजीत कदाचिदपि यो द्विजः ॥ अज्ञानाद्यदि भुंजीत प्रा
जापत्यं समाचरेत् ॥ यति विधवा ब्रह्मचारिणामन्नं द्वैगुण्यं इति हेमाद्रिविरचिते क्रीतान्नभोज
न प्रायश्चित्तं अथ संघान्नभोजन प्रायश्चित्तमाह देवलः संघीभूय पदा विप्राः स्त्रियो वा राजवक्त्र
मा ॥ स्वैः स्वैर्द्रव्यैरेकभांडे पाचयेयुः पृथक्पृथक् ॥ पृथक् पचति तिमिन्नपात्रे वा ॥ यत्कारो ब
भवा पुत्रे शूद्रतुल्या भवंत्यतः ॥ जाबालिः विप्राश्च देवा मत्यच्छ्यात्तीर्थयात्रादिकर्मसु ॥ संघीभूयस्वे
द्रव्यैर्यःपाचयित्वापि भोजनः ॥ शूद्रतुल्या भवंत्येते नरकं यांत्यशेषतः ॥ एकया मस्थ इति पदं पत्रेप
त्रसंघीभावस्तत्र योजनीयं ॥ गौतमः ॥ संघीभूय द्विजाः सर्वे मार्गे तीर्थे ग्रामे पदा ॥ स्वद्रव्ये ज्जनं

प्राह कृत्वायज्ञपशुंत्वेकं स्वर्गतः॥ ते सर्वे नरकं यान्ति शूद्रतुल्या न संशयः॥ तेषां विशुद्धिं मुनिभिरुक्तं प्रायश्चित्तं वि
७४ शुद्धिदं॥ एकरात्रे पंचगव्यं द्विरात्रे पावकं चरेत्। प्राजापत्यं त्रिरात्रे तु षष्ठे चान्द्रायणं स्मृतं॥ मा
74 सेन शूद्रत्वमाप्नुः द्विजानामर्धप्रनीषिभिरिति इति हेमाद्रिविरचिते संघान्नभोजनप्रायश्चि
त्तं अयययागान्नभोजने प्रायश्चित्तमाह देवलः यज्ञेषु पशुबंधे च यायागार्थे पचनं हविः॥ कदाचि
द्विप्रैर्न भोक्तव्यं लोके सुविन कल्मषे॥ पचनं हविरितिप यज्ञशालायां दीक्षितगृहे वासं कादि
तमित्यर्थः॥ महाभारते पशुबंधे तु यज्ञे तु अन्नं प्रति पद्यते द्विजः॥ स वै नरकमाप्नोति सविडालसमो
द्विजः॥ कात्यायनः विप्रो यागशालासु वपायागादधे यदि॥ मुक्त्वान्नं तत्र संभूतं महापातक
सम्भुते॥ पुनः संस्कारोपनयनं प्राजापत्येन शुध्यति॥ एतत्प्रायश्चित्तं वपायागात्पूर्वं भोजने वेदितव्यं
॥ ततः परं भोजनविशेषमाह गौतमः वपायागात्परं विप्रं भोजयेद्दीक्षितालये॥ प्राजापत्यं वि
शुध्यर्थं तु निधिः परीकीर्तितं ऋत्विजां विप्रस्त्रीणां अपि वेदितव्यं तदेवाह कात्यायनः ऋत्विजां च पर एमः ७४
स्त्रीणां भोक्तृणां यागसद्मनि॥ उपोष्य रजनीमेकां पंचगव्येन शुध्यति॥ सुवासिनीनां स्वभर्तुः यागे हो
त्रकं॥ विधवानां केशवपनं ब्रह्मकूर्चविधानं च॥ पतिव्रतचारिणां वपायागात्पूर्वं भोजने भक्ष्ययो।

चांद्रं॥ अतः परं प्राजापत्यं इति हेमाद्रिविरचिते पागान्नभोजनप्रायश्चित्तं अथ चौलान्नभोजनप्रा
यश्चित्तमाह देवलः चौलकर्मणि सीमंते मुहूर्ते भोजने परं सुरापानसमं प्रोक्तमतो नेच्छंति सूरए।
यः॥ गौतमः सीमंते पुंसवे चैव चौलकर्मणि यो द्विजः॥ असगोत्रसदन्नादः सुरापीत्युच्यते बुधैः मा
र्कंडेयः चौलकर्मणि सीमंते पुंसवे पोन्यगोत्रजः॥ मुहूर्तादूर्ध्वं भुक्त्वा पीसुरापानमवाप्नुयात् प्रा
यश्चित्तं द्विजैः प्रोक्तं दृष्ट्वान्नादि वविभोजने॥ सुमुहूर्तादारंतसंतमूर्ध्वं देवमादरं॥ जत्वा प्रशुचिर्भावा
नोति सहस्रं विधिपूर्वकं॥ स्त्रीणामर्धं पतीनां चव्रतीनां चांद्रमुच्यते॥ चौलकर्मणि पूर्वे त्रपरस्त्र सप्र
भिति इति हेमाद्रिविरचिते चौलसीमंतान्नभोजनप्रायश्चित्तं अथ गणिकान्नदेवलकान्नभो
जनप्रायश्चित्तमाह देवलः देवार्ताकान्नभुक्त्वाधीत यागणिकान्नभोजनं॥ मद्यपेतौ विज्ञानी
पात्सर्वकर्मवहिष्कृतौ॥ विष्णुरहस्ये देवलकान्नं योभुंक्ते तथा गणिकान्नभोजनं॥ उभौ तौ पापद
प्रोक्तो न संध्या ख्यो कदाचन॥ ॥ गारुडपुराणे देवार्चकस्य भुंक्ते तथा गणिकवेश्मनि॥ भोतौ यावि।
नो प्रोक्तो प्रायश्चित्तमथाहेतः॥ एकरात्रं पंचगव्यं निराजेपावकं स्मृतं॥ मसमात्रे पराकः स्याद्द्वे

प्राहे. ७५ 75

चांद्रमुहीरितं ॥ पतीनांब्रह्मचारी विधवानामेतद्धि गुणं इति हेमाद्रिविरचिते देवलकान्नगणि
कान्नभोजनप्रायश्चितं अथ अस्नात्वाभोजनप्रायश्चित्तमाह देवलः अस्नातामलभुंक्ते अज
पापूयशोणितं ॥ अहूतान्नक्रिमिंभुक्ते अदत्ताविप्रटमश्नुते ॥ महाभारते अरोगी स्नानहीन
स्याकृत्वाभोजनमाचरेत् ॥ पवंत्यन्नभुक्त्वाकीनितावन्मलमुहीरितं ॥ गौतमः अस्नात्वा
भोजनं विप्रो निरोगी कुरुते यदि । समलाशी सदा ज्ञेयः सर्वकर्मसु गर्हितः बिधुधर्मी त्तरेस्व
स्थोविप्रोपदास्नात्वाभुङ्क्तकामोहपरायणः विघातदन्त्कमिच्छति मुनयस्तत्वदर्शिनः श्वात्वक
लेतु चांद्रंस्याद्ग्रहयोगतद्द्वयं स्मृतं ॥ पंचवर्षमूत्रं स्याद्दिनस्नुतयावकं ॥ विधवानांब्रह्मचारि । राम: ७५
णांपतीनांगृहस्थ प्रायश्चितं हैगुणं इति हेमाद्रिविरचिते अस्नानभोजनप्रायश्चितं अथ ।
पर्युषितान्नभोजनप्रायश्चितमाह देवलः जपेनिधापपूर्वं कुर्यदन्नंजलसेचनं ॥ तन्न पर्यु
षितं ज्ञेयंतद्भुक्त्वापापमाप्नुयात् गौतमः इष्टंगंधंजलैसेचं वहुहीनं ॥ ॥ ॥

जलेलिहि पर्युषितंतु तस्माभुक्त्वा चांद्रायणं चरेत् गालवः रथ्याछन्नेन तैलेन पक्वन्नसंस्कृतं च पक्वं दुग्धविरहितं भोक्तव्यम
मयाचांद्रमुच्यते गौतमः हिंगुजीरकसंमिश्रा तिंत्रिणीरसचेष्टितं दुग्धरहितं बाल्ये भोक्तव्या द्विजचांद्रायणैः एतदन्यैः परिकल्प्य दुग्
धरहितं परिकल्पापि पूर्वेदिवसे भोक्तव्यं साक्षात् द्विजचांद्रायणैः एतदन्यैः परिकल्प्य दुग्धरहितं परिकल्पापि पूर्वेदिवसे भोक्तव्यं साक्षात् द्विजन्मभिः दुग्ध
जलसंमिश्रं पूर्वेद्युः कृते भक्ते तत्पर्युषितं स्मृतं तस्माद्भुक्त्वा चांद्रायणं चरेत् त्रिरात्रं पंचरात्रं वा भुक्त्वा पर्युषितं द्विजः तस्योपनयनं भूयश्चांद्रायणमथा
चरेत् ब्रह्मचारी विधानाद्यती नाप्नोति प्रायश्चित्तं ब्रह्मचारिणां संवत्सरं पर्युषितान्नभोजने पुनरुपनयनं चांद्रायणं च इति हेमाद्रि विरोध
से पर्युषितान्नभोजने प्रायश्चित्तं अथ दुग्धभक्ष्यभक्षणप्रायश्चित्तमाह देवलः दुग्धसहितं भक्ष्यं तथा पर्युषितं च यत् गुड
ल्गोमांसं तिलमिश्रं विवर्णितं च वक्ष्येत् तैलपक्वं विहीनं च न भोज्यं स्याद्द्विजातिभिः पराशरः भक्ष्यं वै माषसंभूतं विप
णस्थमतैजसं दुग्धं पलितांगं च पितृदेववर्जितं राजगृहे च राजन्ये माषसंभवः निष्कारणं नयाति विप्रो न भुंजी
यात्कदाचन गालवः अनुत्तिष्ठितवस्तुनि शुष्कभक्तानि शुष्कलोः महिषाक्षीमाषसंभूता हिंगुजीरकपरिकृतः दुग्धपूरितां
धौतिविवर्णस्थानि यानि च अनर्पितानि देवानां शुभयै त्वकवर्जितं न भुंजीयाद्धिमानीहविः प्रस्थान्न भुक्त्वा नस्यैव वसे
कृतिदृष्ट्वा विप्रे धर्मे पराशर ऋषयो भक्ष्याधिमंपाभलमार्जितया केवलं महिषीदुग्धं द्विजः पीत्वा तप्तकृच्छ्रं तस्योपनय
नं भवत्यलमहृच्छेण शुध्यति विप्रस्त्रीणां ब्रह्मचारिणां पूर्ववत् द्विगुणं प्रायश्चित्तं वेदितव्यं स्मृतिरूपः क्षीरयाने औषधार्थं तत्र
कृच्छ्रमात्रं पुनः पठेः त्रिरन्यैर्देवकार्यार्थं पक्वमुक्तान्नहेमभार जिह्वावापलमात्रस्य भक्षणेऽघोरकृच्छ्रः कृच्छ्र

प्र॰ हे॰
१६
76

तानिहभक्षितानापापकंहोह्यमावहेत् शोभनेपित्र्यकार्येषु देवकार्येषु राघवभस्मापित्वापि विप्रस्तत्तद्दोषैर्नविद्यते स्त्रीणामेतार्थे
विधवाब्रह्मचारिणीयतीनोविधिर्द्धिज्ञातं इतिहेमाद्रिविरचिते अभक्ष्यभक्षणप्रायश्चित्तं अथदुष्टशाकभक्षणप्रायश्चित्त
माह देवलः कणिकारस्यचपलछत्राकंपत्राकंमञ्जलीकृतं वंश्पोपयवशाकंचशोकमारखुमवंतथा गर्गरीवंच
लौशाकंचवल्लीवल्लभवंतथा करंजशाकंअभक्ष्यंदैवतापित्र्यवर्जितं असमृपतनंसंधीतत्वच्छाकंपरिवर्जयेत्
उत्त्रपनेकायछत्राकंपत्राकंपालत्ताडिनं पलाण्डुलशुनंग्रंजनंभावदुष्टंचविवर्जयेत् एतानिविप्रोनभुंजीयाद्यदा
तानितुभक्षयेत् ज्ञात्वाभक्षयेद्यदापापीयोयोब्रह्मजीविप्रा परेषुअभक्ष्यपेयंचाभक्षंहिपरमेश्वरः सरेरानेनशुद्धिमा
प्नोतिदिवसत्रयात्भुक्त्वाद्विजः स्त्रीणांविधवाब्रह्मचारिणीयतीनांचपूर्ववत् इतिहेमाद्रिविरचितेदुष्टशाकभक्षणप्रायश्चि
त्तंअथकारणंविनाकृसरान्नपायसान्नभक्षणप्रायश्चित्तमाह देवलः परमान्नंचकृसरंचयावकाद्विजोनरः ॥ भुंजीयालोकवल्लभ
स्तुनरकेवासमश्नुते ॥ मार्कण्डेयः रौधत्तुःसमापाकेगृहेकन्यारजस्वला ॥ पित्र्येदेवंचपार्थेपरमान्नंप्रशस्यते ॥ धनुर्मासेकृसरान्नंप्रशस्तं ॥ दुहिताशि
श्वनकन्याभगिनीसुषावाप्रथमरजस्वलातत्रकृसरान्नभोजनेतीर्थेपात्रायचनदोषः ॥ तथाहगौतमः धनुर्मासेगृहेकन्यापदिस्यात्प्र
मातवाहिवपात्रासुसर्वाहकृसरान्नदोषभाक् ॥ प्रेतकार्येपुरेवक्रपोपुवंधुसमागमेपरमान्नदोषकारी ॥ तथाहमनुः पित्र्यकार्येषुसर्वे
भवेद्वंधुसमागमे ॥ पक्त्वाभुक्त्वातदाननस्यपुर्भतसंसारसंभवो द्विजोविनाशिगृहीतस्यभुक्त्वापापसमश्नुते ॥ छर्देयित्वातदन्नेचउपोष्य
जनीगमिमा ॥ पंचगव्यंपिवेत्समस्ताचांद्रापहोमवर्जितानाम्ययी ॥ हविष्यारीनांपूर्ववत् ॥ इतिहेमाद्रिविरचिते कारणंविनाकृसरान्नपरमा राम
१६

न्नभोजने प्रायश्चित्तं अथैकादश्यामन्नभोजनप्रायश्चित्तमाह देवलः एकादश्यां तु भुंजीत पक्षयोरुभयोरपि ॥ यदि
भुंक्ते स पापिस्मा द्दोरवं पाश्चिदारुणे ॥ मार्कंडेयः हरिवासरभुक्तापि जीत्यन्नविमर्द्दमः ॥ ग्रहीत्वा कुलेन याराजनं सहांतं
रकं व्रजेत ॥ गालवः पानि कानि च पापानि ब्रह्महत्यादिकानि च ॥ अन्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे ॥ पु
क्तामिव सरोगाहोनिव चनयोक्षिति केकाम विषयं ॥ निमले न भोक्तव्यं कोचिनत्रधं जंतिनरसममेपिन मार्कंडेयः ब्रह्मनि
घ्नस्य विसस्य सर्वस्य सुसमस्य च ॥ कलयसालाभुक नत्र भुंजनतिरसमिपिन मार्कंडेयः ब्रह्मनपापफलभुक्तन
या १ मौनमः ब्रह्मपसेहरि दिने द्विजोव ब्रह्मपरायण ॥ भुक्त्वा सर्वे सर्वसमः स्यात्पित्रुपवासकृत्ले लभेत ॥ अन्न
या विप्र माधे य मुंक्त्वा चांद्रायणं चरेत् ॥ गालवः एकादश्यां तु भुक्त्वा पापी प्रष्यपर्वा रमा चरेत ॥ विप्र वे सममत
प्र भुक्त्वा रोषैर्न लिप्यते ॥ विष्णोवानांत्राति नासं न्यासौ नादिगुणं प्रायश्चित्तं इति एकादश्यन्नभोजनप्रायु
श्चित्तं अथ व्रात्यान्नकुय्यन भोजने माह देवलः व्रात्यानां परिकुर्यान्नं भुंक्तो विमः स धातुरः ॥ क बलेक चले
चांद्र भुक्त्वा शुद्धिमवाप्नुयात् ॥ मरीचिः नग्नेवेर परिलागी वासोपायत्रिनाशकः ॥ कृष्णीनत्रसविज्ञे पोडुष्व
र्मामात्रघातकः ॥ तपोरत्नं द्विजोभुक्त्वा शुद्धिमाप्नोति पण्यादिरु पराशरः इष्टमेण स्वयं वाससवअ नं मुक्त्वा
द्विजः सकृत ॥ तस्यारेह विशुध्यर्थं चांद्रमकं तु नीस्वरैः ॥ विधवादीनां पु वे वत ॥ इति द्विमासितिविरविन
वासात्तकुर्यन्नभोजनप्रायश्चित्तं अथ कुंडगोलकयोः मारिवि तिपारेवजैत्रारत भोजमंत्रा प्रायश्चित्तमाह

प्रा॰ हे॰ देवलः कुंडश्च गोलकश्चैव परिवेत्तृवत्॥ तेषामन्नं न भोक्तव्यं विप्रैः पापपराङ्मुखैः॥ कुंडगोलकपरिवेत्तॄणां लक्षणमाह मरीचिः स्वस्थे भर्तरि
७७ यो नारी जारसक्ता भवेद्यदा॥ तदुत्पन्नस्तु कुंडः स्यात्सर्वकर्मबहिष्कृतः॥ मृते भर्तरि या नारी जारात्पुत्रमुपानयेत्॥ स वै गोलकसंज्ञः स्या
त्सर्वधर्मबहिष्कृतः॥ स्वस्थं ज्येष्ठमनुत्सृज्य कनीयानुद्वहेत्स्त्रियं॥ ज्येष्ठः परिवित्तिः स्यात्परिवेत्ता स चानुजः॥ तस्मात्तः परिवित्तस्यात्परि
विंशो गतिप्रजः॥ पतनत्वपोर्ध्वक्रमसंस्कारराज्यपानने॥ आरोहेत्स्वरोहस्पैव वेदितव्यं॥ गालवः कुंडगोलकश्चानन्तं परिवित्तस्तथैव च
॥ परिवेत्तृपरं नांतं त्वस्त्राणां च परं भवेत्॥ तपोर्ध्वं क्रमसंस्कारे परस्त्वे तु न दोषस्थिति॥ तदन्नं सपरित्याज्यं पूर्वजैर्धर्मवत्सलैः॥ पराशरः
परिवित्तिः परिवित्तिः परिवेत्ता तथा तौ कुंडगोलकौ॥ तेषां ज्ञात्वा पौत्राश्च परमत्तौ युक्तमौ यदि॥ तेषामन्नं न भोक्तव्यं मुख्यजैर्धर्मलिप्सु
भिः॥ तत्र भुक्त्वा द्विजो ज्ञानाद्देवाचारे विधिं चरेत्॥ चान्द्रायणमितस्पर्शे॥ मासे चान्द्रायणं कं च चरेत्संवत्सरे मृगु॥ चान्द्रायणं पराकं चाप्रा
ज्ञापत्यं समाचरेत्॥ अतः परं तत्सम भस्पाद्रपंकेपः सराग्धचिः॥ विधवादिनापूर्ववत्. इति हेमाद्रिविरचिते कुंडगोलकाद्यन्न
भोक्तॄणां प्रायश्चित्तं॥ अथ पतन्तन्नदं पत्या परिशिष्टान्नभोजनः न प्रायश्चित्तमाह देवलः पत्युर्नैव पतिपात्रस्थं पत्नी नांपरेरकं न या॥
दं पत्न्यो भुक्तशेषं तु भुक्त्वा चान्द्रमाचरेत्॥ पतिदेव्या पणपत्रेपि त्वा समाराधनं करोति तत्पत्न्यंपतिर्भिक्षामठि त्वा स्वभोजनोपरि प
उच्छिष्टं यंत यति पात्रस्थं स्त्री पुरुषयो भुंत्वयनंतरं परिशेषितं तदन्नपरिशिष्टं तदाह मनुः धर्मार्थकामो संसज्यप्रयमंममतां वृजे
त्॥ इति धर्मपरित्यज्य पतिः पापपरो भवेत् वालात्मवकुलवद्दाम्यपोषिनातुरकंन्याका॥ संभोज्यानिषि भत्यांश्च दंपत्योः शे राम
षभोजनं॥ इदं धर्मपरित्यज्य विपरीतं तमो यदि॥ तत्र भुक्त्वा द्विजोपस्कनर चान्द्रमाचरेत्॥ गौतमः पतेरारायने भुक्त्वा पत्न्यन्नं ७७

भोजनपरिहं यस्तोऽभुविशिष्टन्तु भुक्त्वा चान्द्रायणं चरेत् ॥ विष्णुवादिनापूर्ववत् ॥ इति हेमाद्रिविरचिते पत्यन्नरंपरिशिष्टान्नभोजनप्रायश्चि
त्तं अथ उच्छिष्टान्नभोजनप्रायश्चित्तमाह देवलः उच्छिष्टं घनं पारद्यातं विडालाखुविमर्दनं ॥ पूर्वोक्तप्राकसंपुक्तं पलांडुलशुनार
तं ॥ देवपूजाविहीनं तु वैश्वदेववर्जितं ॥ एकपंक्त्युपविष्टेन ब्राह्मणेन विषाजितं नप्रक्षालनभांडेषु तथा मौनविवर्जितं ॥ पुत्रःपौ
त्रैरन्नैर्वापि त्रिपौत्रैरथापि वा ॥ भार्याविलोकने चैव पयश्चर्म चमसासिक्तं ॥ देवान्तबालपेचपभुक्तं परान्नं मत्स्यसंभवं ॥ सिग्धाते
नैव स्पर्शेण वस्त्रेनानिलेन च वा ॥ श्वानं तं पि दृष्टिकृतं चान्नं परं त्वं जीवितं तुलं ॥ तुषपाषाणसंयुक्तं फलीकरणमिश्रितं ॥ एतदुच्छिष्टं
विजानीयात् त्यक्तं गालवादिभिः ॥ एतद्भुक्त्वा द्विजोपस्तक महापंसमश्नुते ॥ भोक्तुरागमनात्सर्वं भोजनपात्रे परिवेषितं त
स्मान्निक्तं शेषमस्पृष्टं ॥ गौतमः उच्छिष्टं यो द्विजो भुक्त्वा पर्वभुक्तं मनीषिभिः ॥ पश्चाद्देहविशुद्ध्यर्थं पराकं कृच्छ्रमाचरेत् ॥ एतत्स
मोत्राचालभोजनविषयं ॥ भगिनीपुत्रादिसहभोजने सुत्रीपुत्रादिभोजने ह्येगुण्यं ॥ विधावाब्रह्मचारीपतिनां पूर्ववत् इ
ति हेमाद्रिविरचिते उच्छिष्टान्नभोजनप्रायश्चित्तं अथ पत्नीसहभोजनप्रायश्चित्तमाह देवलः द्विजः कामातुरो पस्क्तपत्न्यासह
परं नभुक् ॥ पश्चाच्चान्द्रायणं कृत्वा शुद्धिमाप्नोति पौर्विकी ॥ पत्नीसहभोजनकालमाह मनुः महारण्ये च पात्राभावे पथि चोर
समाकुले सति ॥ असत्पापो परि भवेत्तदा भुंक्ते न दोषभाक् ॥ गालवः विवाहकाले पात्राभावे पथि चोरसमाकुले ॥ असह्यपो भ
वे द्विप्रस्तदाकार्ये द्विजन्मना ॥ एकत्र पानमारोहे एक पात्रे तु भोजनं ॥ भार्या पानतदा भुक्त्वा विप्रस्तत्र न दोषभाक् ॥ अन्य
त्र भोजने महदां तं नरकं व्रतेत् ॥ तद्दोषपरिहारार्थं पश्चाच्चान्द्रायणं चरेत् ॥ पराशरः एकत्रापानमारोहे एक पात्रे तु भो

३

प्राः हेः जनं ॥ विवाहेपथिपात्रापांकृत्वा विप्रोनरोयभाक् ॥ अन्यथादोषमाप्नोतिपश्चाच्चांद्रायणंचरेत् ॥ अभ्यासेद्विगुणंचैवकृत्वाशुद्धिम

१८ वाप्नुयात ॥ इतिहेमाद्रिविरचितेपत्नीसहभोजनप्रायश्चित्तं अथशूद्रभांडभोजनप्रायश्चित्तमाहदेवलः यतिश्चनष्टितोविप्रोन

78 शूद्रस्योदकंपिबेत् ॥ नशूद्रभोजनेचैवतज्ज्ञानाघटिमार्गतः ॥ तस्योपनयनंभूयप्रतप्तकृच्छ्रेणशुध्यति ॥ पराशरः ॥ शूद्रभांडो

दकपीत्वाप्रायःसुरकसेवनात ॥ शूद्रभांडस्थमन्नंचभुक्त्वाशुद्धःसदाद्विज ॥ तस्योपनयनंभूयस्तप्तकृच्छ्रंसमाचरेत ॥ तस्माद्देह

विशुध्यर्थंतप्तकृच्छ्रंसमाचरेत ॥ विधवाब्रह्मचारीयमीनारीपतीनांपूर्ववत ॥ इतिहेमाद्रिविरचितेशूद्रभोजनोदकप्रायश्चित्तं

अथपतितदुष्टमर्गदुष्टाक्रांतपंक्तिभोजनेप्रायश्चित्तमाहदेवलः पतितश्चस्वश्नेवडर्जनः पिशुनस्तथा ॥ जातिभ्रष्टापकश्चैवनि

त्यंपात्रायरस्तथा ॥ भिषक्चोरस्तथामअन्येनापीभयपदः ॥ एतैर्वैदुर्जनाःप्रोक्ताअपांक्तेयाकदाचन ॥ गालवकुंडश्चगोल

कश्चैवअपजनांचयाजकः ॥ त्यक्तांकितवनराजनतुयातिंगांकिनोपिवा ॥ चारूवाकोदयकश्चैवनग्नःकितवस्तथा ॥ एतैरावेष्टिता

पक्तिपापदासर्वदानृणां ॥ एतस्यामन्नमुक्त्वाविप्रःपापमेवसमाप्नुयात् ॥ एकत्रभोजनेराजन् चांद्रायणमथाचरेत मासभोजम

हापापीचांद्रायणकमाचरेत ॥ वर्षभोजीमहाचांद्रंकृत्वाशुद्धिमवाप्नुयात ॥ विधवादिनांपूर्ववद्द्विगुणंइतिहेमाद्रिविरचि

तेपतितदुष्टाक्रांतपंक्तिभोजनप्रायश्चित्तं ॥ अथपिण्याककरंभपिततक्रपानपलांडुलशुनगृंजनादिभक्षणप्रायश्चि

त्तमाह देवलः शुनंगृंजनंतक्रंपलांडुविलयनंतथा ॥ पक्वभोज्यंचब्राह्मणेनज्ञात्वापापंसमश्नुते ॥ गृंजनेकामजंनकामरघ्यर्थप राम

र्णचूर्णकरंभापिततक्रंविलपनंनघृतमलंबानक्ता ॥ शेषापरिज्ञातंछत्रैराग्नितानिविशेषेणभोक्तव्यानितदेवाहमार्कंडेयःछ १८

त्राकं विट्वराहं च पलांडुं ग्रामकुक्कुटं ॥ लशुनं गृंजनं चैव मत्या जग्ध्वा पतेद्द्विजः ॥ ज्ञात्वा भुक्त्वा तु चांद्रं स्यादज्ञानमपीरितं ॥ संकरे
ते विज्ञानी पादद्भु वारि द्विवारतं ॥ आः व्हाह ऊर्ध्वे महापापी पतितं स्यान्न संशयः ॥ विधवादिनोपूर्ववत् ॥ इति हेमाद्रिविरचिते लशुनगृंज
नादिभक्षणे प्रायश्चित्तं अथ श्वेतवृंताकरक्तशिग्रुवृंताकालाबुकलिंगभक्षणप्रायश्चित्तं तमाह देवलः वार्ताकनककालिंगविल्वोदुं
बरभिःसटाः ॥ रक्तशिग्रु मलांबुं च भुक्त्वा चांद्रायणं चरेत् ॥ गौतमः ॥ वृंताकालांबु रक्तशिग्रु श्वेतवृंताकमेव च ॥ कलिंगभिःसटावि
ल्वंकं तमोदुंबरं तथा मत्या जग्ध्वा पतेद्द्विजः पश्चाच्चांद्रायणं चरेत् ॥ महाभारते वार्ताकनककालिंगविल्वोदुंबरभिःसटाः ॥ कुसुंभपत्रम
वर्तं तस्य हरन्नरो हरिः ॥ रक्तशिग्रु मलांबुं च श्वेतवृंताकमेव च ॥ सभक्ष्य पित्वा द्विजो यस्तु स तु चांद्रायणं चरेत् ॥ विधवा पतिव्रह्मचा
रिणं पूर्ववत् ॥ इति हेमाद्रिविरचिते श्वेतवृंताककनककालिंगभक्षणे प्रायश्चित्तं अथ ताम्रपात्रस्थक्षीरगव्यादिभक्षणे प्राय
श्चित्तं माह देवलः ताम्रपात्रास्थितं दुग्धं गोमूत्रं तक्रमेव च ॥ दधि वा ताम्रपात्रस्थं नारिकेलोदकं तथा ॥ द्विजः पीत्वा सुरापानं कृतवा
नत्र संशयः ॥ अज्ञानात् ज्ञानतो वापि सुरापानसमं विदुः ॥ मार्कंडेयः ॥ गव्यं मूत्रं तथा तक्रं नारिकेलोदकं तथा ॥ ताम्रपात्रस्थितं पी
त्वा पपौ लवणसंयुतं ॥ द्विजः कुर्यात् सुरापानमज्ञानाद्वा हि भक्षणं ॥ कृत्वा शुद्धिमवाप्नोति महापापेन तयेदं वं ॥ पराशरः नारिकेलो
दकं ताम्रपात्रस्थं गव्यमेव च ॥ लवणाक्तं पयः पथ्यं चैव मघाघ्राणं तथैव च ॥ पीत्वा द्विजश्चरेच्चांद्रं श्रुत्वा पत्यमकामतः ॥ मघाघ्रा
णो विप्रो यमाह देवलः हिंताल तालखर्जूरनारिकेलवनेचरान् ॥ देवाद्दापवरणात्वाप्तं संध्या त्वादिप्रस्पर्शिण हस्तमाघ्राय पशुध्यनी
अमावेमांतेउं परस्पमन्तस्पर्शासिणश्चवणं स्पृष्ट्वाह दिंमनाप्ति स्मरन्न शुध्यति ॥ ततः परं नास्तिकां विधायागछेत् ॥ ग्नि पानशाप

प्रा:है ७८ 79 पश्चिन्नमाह देवलः विप्रस्तु पीतशेषं तोयमन्यः पिबेद्यदि ॥ मद्यपानसमं प्राहुस्तत्रोपंमुनिपुंगवः व्यासः पीतशेषं द्विजः पीत्वा स
रापानसमं जलं ॥ पीत्वाज्ञानद्विजः कुर्यात्स्नानं जापसं विशुद्धये ॥ गौतमः एकपंक्त्युपविष्टानां विप्राणां पात्रसंस्थितं ॥ पीतशेषं द्वि
जाः पीत्वा जलं कुर्यात्स जापतिं ॥ एतेन शुद्धिमाप्नोति निन शुद्धस्तन्यथा हि द्विजः ॥ पीतशेषमपं तोयं किंचिद्भ्रमोनिपानपित्वा पीः
त्वा पीत्वा नरो द्विषः ॥ तथाह मार्कंडेयः पात्राभावे जलमावे पीतशेषं द्विजः पिबेत् ॥ भ्रमोकिंचिन्निपातात्स्यात्पीत्वा विप्रोनरो
षभाक् ॥ जाबालिः पीतशेषं कंवधंपः पातुमिच्छन्नद्विजोपरि ॥ भुविकिंचिज्जलं क्षिप्त्वा पीत्वा न तत्र विशुध्यति ॥ एतत्स्पष्ट
व्याख्याभावविषयं ॥ पात्रे विद्यमाने समिस्त पात्रस्थोदकं पिवेत ॥ तत्प्रमः आसनं शापनं वस्त्रं जायामंत्रं कमंडलुं ॥ आ
त्मनः शुद्धिरेतानि परेषामशुचिर्भवेत् अतस्तपात्रस्थोदकसमीचीनं ॥ अभोवपूर्वोक्तं कृत्वा शुध्यतिइत्सर्थः इति हेमाद्रि
विरचिते पीतशेषोदकपानपानप्रायश्चित्तं अथ मुखेनोदकपानस्पर्शदृष्टिरपा क्षीरपानमतवत्सगो क्षीरपान प्रायश्चित्तमाहदेवलः उष्ट्र
क्षीरं मृगीरंसांधिन्यंपमलं तथा ॥ मुखेनोदकपानं च मत्तवत्सापयस्तथा ॥ पीत्वा द्विजः सकृन्मोहात्केवलं महिषीपयः ॥ तस्योपनय
नं भूयस्तस्य कृच्छ्रं विशोधनं ॥ मृगीरंसांधिन्यंपमलं तथा ॥ मुखेनोदकपानं च मत्तवत्सापयस्तथा ॥ पीत्वा द्विजः सकृन्मोहात्के
वलं महिषीपयः ॥ तस्योपनयनं भूयस्तस्य कृच्छ्रं विशोधनं ॥ मत्तवत्सापयं मुखेनोदकपानं नेत्यर्थः ॥ मार्कंडेयः मत्तवत्सा प
यः पीत्वा मुखे पीत्वा जलं द्विजः ॥ उपोष्य रजनीमेकां पंचगव्येन शुध्यति ॥ गौतमः संधिन्यंपासलंडुग्ध उष्ट्री क्षीरं खमार्गजं ॥ राम
खरोष्ट्रयोः पयः पीत्वा पुनः संस्कारमर्हति ॥ पश्चादेहविशुध्यर्थं तस्य कृच्छ्रं समाचरेत् ॥ एतेन शुद्धिमाप्नोति नान्यथा शुद्धि ७८

रिष्यते ॥ प्राजापत्यैः खरोष्ट्रयोश्च संधिन्यं पाम लमार्गजं तथा ॥ केवलं तं महिषीदुग्धं द्विजः पीत्वा तप्यत्यघः ॥ तत्थोपनयनं भूयः
प्रकृच्छ्रेण शुध्यति ॥ विप्रस्त्री यां ब्रह्मचारिणां प्रवृत्तं च द्विगुणं प्रायश्चित्तं वेदितव्यं ॥ खरोष्ट्रयोः क्षारपाने औषधार्थं तत्र कृच्छ्र
मात्रं पुनः संस्कारः तथाह गौतमः औषधार्थं द्विजः पीत्वा दुग्धं खरक्रमेलयोः ॥ तप्तकृच्छ्रं चरेत्पश्चात्पुनः कर्म गौरवात् ॥ इति
हेमाद्रिविरचिते उष्ट्रीखरादिपाने प्रायश्चित्तं ॥ अथ मनुष्यमगाधस्यादि मलमूत्रभक्षणे प्रायश्चित्तमाह देवलः ॥ मनुष्यस्य
खरस्याथ सूकरस्य द्विजन्मनः ॥ मलमूत्रं पिबेद्यस्तु रेतो वा रोगपीडितः ॥ द्विजः पश्चात्पुनः कर्म तत्संकृत्वा विशुध्यति ॥
अज्ञानाच्छर्दिमाप्नोति ज्ञात्वा चान्द्रं विशोधनं ॥ आतुरानातुरविषयं ॥ आतुरविषये विशेषमाह गौतमः आतुरो रोगमुक्तश्चेत् खरमा
नुषसूकराः ॥ एतेषां मलमूत्रं च पीत्वा दोषो न वाप्यते ॥ रोगी तेह शुध्यर्थं तत्सकृच्छ्रं चरेत्सखी ॥ अनातुरः पुनः कर्म कृत्वा
शुद्धिमवाप्नुयात् ॥ जाबालिः द्विजः पीत्वा मूत्रं खरमानुषयोस्त्रिणः ॥ अगदो देहशुध्यर्थं तत्सकृच्छ्रं चरेत्सखी ॥ अ
नातुरः पुनः कर्म कृत्वा शुद्धिमवाप्नुयात् ॥ एतेन शुद्धिमाप्नोति न चान्यैः कर्मभिर्द्विजः ॥ यमः द्विजो ज्ञानान्मूत्रं
खरमानुषयोः किरेः ॥ मयूरहंसगृध्राणां सकृत् भक्षात्पातकी ॥ पुनः कर्म प्रकुर्वीत तत्सकृच्छ्रं विशोधनं रोगिण्यो
न पुनः कर्म कृच्छ्रमात्रमुदीरितं ॥ सखी मत्वा पिबन्नस्त्रं नारीणामर्धमीरितं यतीनां ब्रह्मचारिणां विधवानां
द्विगुणं तं ॥ ॥ इति हेमाद्रिविरचिते मानुषखरसूकरादिमलमूत्रभक्षणे प्रायश्चित्तं ॥ अथ गरुड्ठ वर्मणा सि लो

प्रा: है
८०
80

मकेशामलोपहतशाकान्नभोजने प्रायश्चित्तमाह देवलः शाकमध्येऽन्नमध्ये च दंतकेशनखामल॥ अस्थि चर्म द्विजः स्या

स्यामं लोमकीटखरस्तथा॥ बहून्नेन परित्याज्यं स्वपात्रस्थं परित्यजेत्॥ वन्नप्रमाणमाचारप्राये द्रव्यशुद्धिप्र

करणेभिहितं॥ अत्यान्ने विशेषमाह गौतमः॥ अत्यान्ने शाकमध्ये वा यदि स्याद्द्विजः॥ दंतकेशानखाविष्ठा

द्विजलोमास्थि चर्म च॥ कीटाखक्रिमयस्तत्र पचनं संपरित्यजेत्॥ स्वपात्रस्थे तु हे चाल्पमुत्तमन्नं संपरित्य

जेत्॥ मत्स्यनंतरं शाकान्नपात्राग्रमानेतरन्नं छर्दयित्वा उपोष्य शुध्यति॥ छर्दिभावे घटिकासप्तमध्यासेरा

त्रिभोजनं चिरस्थगायत्र्याष्टशतं जप्त्वा पंचगव्यं पीत्वा शुध्यति तदेवाह मनुः ज्ञात्वामेध्येषितं भुक्त्वासुक्त्वामुक्त्वावि

मप्रमादतः॥ द्विशुद्धं न मद्दुर्नैवाजनदत्तं जीर्णं नामरात्॥ तदेते वमनं कृत्वा शुद्धो भवितुमर्हति॥ नोचेत्सरो घृतक्षासिस्ला

त्वा ज्ञात्वविधानतः॥ अष्टोत्तरशतं पश्चात्पंचगव्यं पिबेत्ततः॥ शुद्धिमाप्नोति ऐजे दृष्ट्वा शुद्ध खम्पाद्वि

ज्ञदृशि जाबालिः पक्वं चाल्पं त्यासजेत्ख्यकं अन्नमल्पं त्यजेत्तथा॥ एतैरुपहतं भुक्त्वा तदानीं छर्दि

माचरेत्॥ जलेपरे घृतसिक्तावादे वीजपेन्मूर्त॥ वृश्चिक ॥ ॥ ० ॥ ॥ ० ॥ ०

चैविधानेनपंचगव्यंपिबेत्ततः ॥एतेनशुद्धिमाप्नोतिमलमयंतत्परित्यजेत्॥बहुकेशोपपन्नान्नयोमर्त्योऽश्नाति तेषुपूर्ववत्प्रायश्चित्तं एकस्मि
न्नश्नितेविशेषमाह गौतमः अन्नेवापक्वपक्वेवाकेशमात्रेऽप्यवस्थिते॥ कवलेवापिराजेन्द्र कवलंतत्परित्यजेत्॥गंडूषमेकं कृत्वान्नशेषान्नं प्रोक्ष्य
पञ्चलैः॥मद्भस्मक्षिपेत्तत्रपश्चात्भक्षन्नदोषभाक्॥मद्भस्मसर्वेसर्वः॥अन्येनोक्तिमिर्वा स्वपात्रस्थमन्नंप्रोक्षणादिभिःशुद्धि
कारयित्वा॥स्वयंगंडूषमेकंकृत्वानदोषभाक्सर्वः इतिहेमाद्रिविरचितेचर्मास्थिनखमलादिदूषितान्नभाजनेप्रायश्चित्तं अथभोजन
कालेदीपनिर्वापणप्रायश्चित्तमाह देवलः दीपःप्रज्वलयनवास्याभोजनेनाग्निसाधुयात्॥ध्वस्तपात्रेततस्सेर्वान्तिमस्त्यन्नंभक्षयं
॥पुनर्दीपागमेतावत्तगायत्र्यान्नेजलंक्षिपेत्॥ तदन्नमसजनस्सभक्ष्यशुद्धिमाप्नोतिपंडितः॥अन्यदन्नंपुनर्भक्ष्यपंचगव्यंपिबेत्तदा॥पूर्वं
परिवेषितान्नमेवभोक्तव्यनपुनर्देतव्यं॥जाबालिः ब्राह्मणानांभोजनेकालेयदादीपोविनश्यति।पाणिभ्यांपात्रमासाद्यभास्करं हृदिसं
स्मरेत्॥पुनर्दीपंस्थितंदृष्ट्वाशेषमन्नंसमापयेत्।पुनरन्नेनभोक्तव्यंभक्त्वाचांद्रायणंचरेत्॥ इतिवचनात्॥गौतमः दीपोपशमनेपुनरुज्ज्वे
ल्य पुनर्नतैलवर्जितात्॥पाणिभ्यांपात्रमुधस्सम्भमोतंरमभक्ष्यं॥पुनर्दीपागमेवान्नंस्थितापात्रेपरिकृतं॥नपुनस्ततत्प्रदत्तव्यंभक्त्वा
शुद्धिमवाप्नुयात्॥विधावादीनामेवंवेदितव्यं इतिहेमाद्रिविरचितेभोजनकालेदीपनाशनप्रायश्चित्तं अथएकहस्तवामहस्तपटपाषा
णादिभोजनेप्रायश्चित्तमाह देवलः एकहस्तेनवामेनपद्मपुष्पेपलेवचि॥पाषाणेताम्रपात्रेवाभक्त्वादोषमवाप्नुयात्॥ गौतमः त्वचिपुष्पे
पपाषाणेतप्तवल्कलपत्रके॥ उपकापांमुनिश्रेष्ठवामहस्तेनवाद्विजः॥एकेनपाणिनातोयंपाने दोषमवाप्नुयात्॥मरीचिः एकेनपाणिनातो
यपानंवामेनभोजनं॥त्वचिपुष्पेफलेवापिपाषाणेताम्रभाजने॥ उपलापांचवल्लेवाद्यं जलौस्थडिलेपिवा॥भक्त्वान्नंपर्वजंतानाकाय
कृच्छ्रंसमाचरेत्॥हारीतः उपलापांचवल्लेवाप्यजलौस्थंडिलेपिवा॥त्वचिपुष्पेमवेवापिपाषाणेताम्रभाजने॥ एकेनपाणिनातोयं
पनेवामेनभोजने॥द्विजस्तमन्नमयपात्रेभक्त्वाकायंसमाचरेत्॥व्रतार्थेवामहस्तभोजनस्त्रीणांनदोषः गालवः काम्यार्थेभोजनेनाति

प्रा॰ हे॰ वामहस्तेन सर्वदा॥ न तेन दोषमाप्नोति व्रतं यावत्समापयेत्॥ कंडूतिव्रणादिभीः क्रांते वामहस्तदोषः। गौतमः वामहस्तेन संजीयाद्द्विजोऽसत्र
८१ व्रणादिभिः॥ दुःखेन तेन दोषः स्यादन्यथा भ्रष्टतां व्रजेत्॥ ॥ इति हेमाद्रिविरचिते एकहस्तपानवामहस्तभोजनादिप्रायश्चित्तं॥ अथ वालाश्रि
तस्त्रामिभोजनप्रायश्चित्तमाह देवलः स्नामेवायदृष्टोपस्पाकुणापो विप्रसंचितः॥ ततोऽवम्भोजनं कुर्याद्यावत्स्नामेव समथ॥ महाभारते बालो
४१ वाकन्यकाना वितिप्रोवाचयति तं विनी॥ मलाग्नामे स्थितो यत्र विप्रस्तत्र न भोजयेत्॥ यदि भुक्ते सपामीयान तदन्नं त्रिमिसं स्मृतं॥ मरीचिः
यदृष्टो खगद्देश्याज्यं ग्रामेवाप्यः परित्यजेत्॥ अन्यत्र सर्वैः संत्याज्यं भोजनं तोयधारणे॥ संवर्तः यत्रैव यत्रास्ति शिष्टस्तु विप्रस्तत्र महाजनः
॥ पाकयज्ञं ततत्याभतिं जलहारणमेव च॥ न कुर्यात्तावता विप्रो यावत्तिष्ठति भूतले॥ वीतपंचगव्यमतः परं॥ बालानां स्त्रीत्यागेन दोषो
गृहमेधिनो॥ एतत्सर्वं चासमं इति हेमाद्रिविरचिते नूवाश्रितानामे भोजनप्रायश्चित्तं अथ सर्पसोमोपरागे सूर्यकालभोजने प्रायश्चित्त
माह देवलः सूर्यसोमोपरागे चंद्रक्तकालं विना द्विजः॥ तद्दत्त्वेमां समिस्याहुस्तम्भोक्ता मासमभक्तदा॥ मरीचिः सूर्येनदेतुनाश्नीयात्सूर्वेया
मच तु प्राये॥ चंद्रग्रहे तु यामां स्त्री न भक्षणायं समस्तुते॥ इति धर्मयारिसज्ञयो विप्रस्तत्र याचरेत्॥ तस्योपनयनं भूयस्तद्द्र सांतपनं
स्मृतं॥ सूर्यग्रहभोजने तप्तं चंद्रग्रहभोजने सांतपने मनुः सूर्योपरागे यो भुंक्ते स तस्य पापं महत्तरं तस्य पापविशुद्ध्यर्थं तप्तकृच्छ्रं न दीरितं॥
चांद्रायणगकालेत भक्ता कापं समाचरेत्॥ उभयो भोजने विप्रः पुनः संस्कारमर्हति॥ विधवा स्त्रीणां संन्यासीनां पुनः संस्कारवर्जे॥ ब्रह्मचारिणा
मेवं इति हेमाद्रिविरचिते सूर्यसोमोपरागकालभोजनप्रायश्चित्तं। अथ पात्रभोजनप्रायश्चित्तमाह देवलः स्वर्णरजतं ताम्रं कांस्येष्वसहंभो
जनं चरेत्॥ तान्नित्यदिरजे दनं कुर्याद्वृचभोजनं॥ जाबालिः स्वर्णरजतकांस्येषु पालामाकदलीकुचविप्रो भुंजन् महल्पंपमवाप्नोति नसं राम ८१
शयः॥ यदि भिन्नं पतिषाज्य तत्र भक्ते दृवं चरेत् एतानि स्वर्णरजतकांस्यानि द्रव्यमात्रं विनाकलितानि सर्वथा तेषां त्याज्यमेव॥ गालवः
स्वर्णे कांस्ये तथा रजत्ने रजतं भिन्नमेव यत्॥ तत्र भुक्त्वा चरेत्स्नाय अन्यथा दोषमाप्नुयात्॥ पालाशकदलीपर्णादिषु एषु भोजनं चरेत्॥ ता

मेवाह हारीतः निमग्नांतरणि अन्यथा पर्ववत्प्रायश्चित्तं ॥ कृत्वा शुध्यति तद्देवाह पराशरः पेषु पर्णेषु यो भुंक्ते तेषु तां मुखजश्चरेत् ॥ अपा
त्रतथाभिन्नतत्र भुक्त्वैवं चरेत् ॥ अभिन्नभांडे एकपात्रभोजने विप्राणां धर्मो वर्धते ॥ अन्यथासीदन्यो प्नोति गोतमः अभिन्नपात्रि
यो भुंक्ता पर्णेष्वेकेषु जातितः ॥ भोजनं कुरुते यस्तु स पर्णोपमभेव हि ॥ सर्वेषामेव वेदितव्यं तत् नान्यत् इति हेमाद्रिविरचिते भिन्नपात्र
भोजनप्रायश्चित्तं अथ संध्यादिभोजनकालेषु चंडालविधिध्वनिश्रवणप्रायश्चित्तमाह देवलः स्नाने भोजनवेलायां जपहोमे
तु येतके ॥ संध्यादिनिसकार्येषु देवपूजासु सर्वदा ॥ चंडालादिविध्वाः प्रोक्तास्तेषां संभाषणादिके ॥ श्रुत्वा कर्म परित्यज्यं दृष्टात पुन
एव तेत् ॥ अन्यथा दोषमाप्नोति कर्मभ्रष्टोभिजायते ॥ चंडालस्यैव पतकमेष्कलादस्य परिसंजेत् ॥ ग्रामचंडालादीनां ततसाधनध्वनि
श्रवणे कृत्वा भोजनादिकं परिसजेत् ॥ तत्साधनानि ॥ जेकस्य वल्लघटध्वनिः ॥ चर्मकस्य चर्मताडनं ॥ स्वर्णकारस्य स्वर्णताडनं ॥ त
क्षकस्य वाद्यताडनं ॥ हाहघातस्य हाहघातध्वनिः ॥ तिलघातकस्य तिलयंत्रध्वनिः ॥ स्कनोमांसखंडनं ॥ कुलालकस्य आहभांडताडनं
॥ एतेषां तत्साधनभूतानां ध्वनिश्रवणे दर्शने च साज्ञं पुनः कर्मकार्यं पंमार्कंडेयः एतेषां साधनानां च ध्वनिं कृत्वानुकर्मसु ॥ कर्मत
त्परित्यज्य श्रोत्रं स्पृष्ट्वा च दक्षिणं ॥ अशीति पयसा स्याखा पुनः कृत्वा विशुध्यति ॥ दर्शने संपरित्यज्य पुनः कर्म समाचरेत् ॥ अन्य
थाभोजयेद्विप्रः कर्म कुर्यात्तथापरिः ॥ अष्टोत्तरशतं हुत्वा गायत्रीं वेदमातरं ॥ एतेन शुद्धिमाप्नोति द्विजो नान्यत्र कर्मणा ॥ यत्ति ब्रह्म
चारिमेवे इति हेमाद्रिविरचिते चंडालादिध्वनिप्रायश्चित्तं अथ सत्कर्माचरणे सूतकदर्शने प्रायश्चित्तमाह ॥ देवलः सत्कर्मं कु
र्वाणं द्विजो दृष्ट्वा तु कर्मसु ॥ तत्कर्म परित्यज्य पुनः कृत्वा विशुध्यति ॥ भोजने भोजनं सत्कृत्य सुखमाप्नोति पर्वजः ॥ अन्यथा दोषमा
प्नोति पतितो मास वर्तते ॥ स्नानादिनिसकर्मसु श्वसूतकादिकं दृष्ट्वा पूर्ववत्प्रायश्चित्तं कृत्वा शुद्धिमवाप्नोति नान्यकर्मभिः ॥
स्त्रीणां पतिव्रताचारिणामेवं प्रायश्चित्तं इति हेमाद्रिविरचिते सूतकादिप्रायश्चित्तं अथ परजसंपान्नभोजनप्रायश्चित्तमाह देवलः ॥

प्रा॰ दे रजस्वलान्नं यो भुंक्ते द्विजो ज्ञानात् सकृद्यदि ॥ ऐन्दवेन रक्तपानं भवेत् पश्चाद् विगर्हितः ॥ ऋतुमत्यश्च ज्ञानात् सवनादिकं कृत्वा भुक्त्वानन्तरं । ईषत्स्पृष्ट
८२ जं दृष्ट्वाहं रजस्वलाभवामीति ज्ञात्वा पश्चात् । ततः स्पर्शतो सर्वे भुक्तवन्तो रजस्वलान्नभोक्तारः तेषां भोक्तृणां पुनः स्नानं मनसा चान्द्रायणाभ्यां विनाशु
82 द्धिर्नास्तीति देवाह मार्कण्डेयः अज्ञानाच्छ्वपचीं नारीं कृत्वा पचनक्रियाः ॥ पश्चाच्छूद्रगृहे जो दृष्ट्वा तस्माद् देशात् स्वपक्षमेत्य । तां हत्वा भाषणाच्छुत्वा भो
क्तारो द्विजनायकाः ॥ कृत्वा शुद्धिमवाप्नुयुस्ते चान्द्रव्रतमनुक्रमात् ॥ पंचगव्येन शुद्धास्युस्तत्र पापापिनो भवेत् ॥ पतिव्रता ब्रह्मचारिणां स्त्रीणामप्येवं ॥
इति हेमाद्रिविरचिते रजस्वलान्नभोजनप्रायश्चित्तं अथ स्वपाकान्नभोजनप्रायश्चित्तमाह देवलः अदृष्टैनो नाविदेवतौ श्वचण्डालादिति निश्चितं ॥
पुष्पवत्यास्सूतिकायाश्च ह्येवापतितादिभिः ॥ अन्नं भक्तं तथा ग्राह्यं भक्त्वा विप्रः सकृद्यदि । प्रायश्चित्ती भवेत्सापीनकामो हे भवेद्द्विजः ॥ गालवः
चण्डालपतितव्रात्याचारादिकाजितेन्द्रियैः ॥ अत्तान्नं वाप्य द्विजो ऽश्वकाकादिपरिदूषितं ॥ मलमूत्रसमीपस्थं तु थांगा केपालवत् ॥ उच्छि
ष्टो । च्छिष्टसंस्पृष्टं भक्ष्यमन्नं चरेत्सम्भवेत् ॥ द्विजैस्तत्तन्नं भोक्तव्यं न चान्नं वा भोज्यमेव ॥ यदि मोहवशाद्भुक्त्वा प्रायश्चित्ती भवेद्द्विजः ॥ लोगाक्षिः पर्वो
ते श्वनिमित्ते वा स्वच्छमुच्छिष्टमेव तत् ॥ तदन्नं यो द्विजो भक्षयाज्ज्ञातो मवाप्य च ॥ स्वर्णपीठे प्रव्य पंचकायकृच्छ्रं समाचरेत् ॥ पंचगव्येन शु
